## पुरुषहस्तिभ्यामण् च । (३८/१८३९)

तदस्य [1]इत्येव, प्रमाणे इति च । पुरुषहस्तिभ्यां[2] प्रथमासमर्थाभ्यां प्रमाणोपाधिकाभ्याम् अस्य इति षष्ठ्यर्थे अण् प्रत्ययो भवति, चकाराद् द्वयसजादयः[3] । पुरुषः प्रमाणमस्य पौरुषम्, पुरुषद्वयसम्, पुरुषदघ्नम्, पुरुषमात्रम् । हास्तिनम्, हस्तिद्वयसम्, हस्तिदघ्नम्, हस्तिमात्रम्[4] । द्विगोर्नित्यं लुक् । द्विपुरुषम् [5]उदकम् । त्रिपुरुषमुदकम् । द्विहस्ति । त्रिहस्ति । द्विपुरुषी[6] । त्रिपुरुषी[7] । द्विहस्तिनी । त्रिहस्तिनी ॥

## यत्तदेतेभ्यः परिमाणे वतुप् । (३९/१८४०)

तदस्य [8]इत्येव । यत्तदेतेभ्यः प्रथमासमर्थेभ्यः परिमाणोपाधिकेभ्यः अस्य इति षष्ठ्यर्थे वतुप् प्रत्ययो भवति । [9]यत् परिमाणम् अस्य [10]यावान् । तावान् । एतावान् । प्रमाणग्रहणे[11]ऽनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात् ।

[12]डावतावर्थवैशेष्यान् निर्देशः पृथगुच्यते ।
मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोः (म. भा. २.३७८) ॥

[५६५] वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसङ्ख्यानम् । (म. भा. २.३७९)

'न त्वा वाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते' (ऋ. ७.३२.२३) । 'त्वावतः पुरूवसो' (ऋ. ८.४६.१) 'यज्ञं [13]विप्रस्य मावतः' (ऋ. १.१४२.२) । [14]त्वत्सदृशस्य, मत्सदृशस्य इत्यर्थः ॥

## किमिदम्भ्यां वो घः । (४०/१८४१)

किमिदम्भ्यामुत्तरस्य वतुपो वकारस्य [15]घकारादेशो भवति । कियान् । [16]इयान् । एतदेव चादेश[17]विधानं ज्ञापकं [18]किमिदम्भ्यां वतुप्प्रत्ययो भवति इति । [19]अथ वा योगविभागेन वतुपं विधाय पश्चाद् वो घो [20]विधीयते (म. भा. २.३७९) ॥

## किमः सङ्ख्यापरिमाणे डति च । (४१/१८४२)

[21]सङ्ख्यायाः परिमाणं सङ्ख्यापरिच्छेदः इत्यर्थः । [22]सङ्ख्यापरिमाणे वर्तमानात् किमः प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे डतिः प्रत्ययो भवति, चकाराद् वतुप्[23] । तस्य च [24]वकारस्य [25]घादेशो भवति । पृच्छ्यमानत्वात्

---

1. इत्यनुवर्तते ह. 2. शब्दाभ्याम् इत्यधिकम् ड. ह. 3. च इत्यधिकम् ह. 4. त्रिहस्तिमात्रम् इत्यधिकम् ह. 5. उदकम् नास्ति फ. 6–7. गङ्गा इत्यधिकम् क. ड. फ. ह. 8. अनुवर्तते ह. 9. तत् फ, 10. तावत् एतावत् ह. 11. इति इत्यधिकम् फ. ह. 12. तावतो क. 13. विश्वस्य क. 14. त्वत्सदृशः मत्सदृशः क. 15. यकारादेशः क. 16. इयान् नास्ति क. 17. वचनम् क. 18. किमिदम्भ्यां – विधीयते नास्ति क. 19. अथ वा नास्ति ड. फ. ह. 20. विधीयेते फ. 21. तदस्य तदेव इत्यधिकम् ड, संख्याप्रमाणं फ, संख्यापरिमाणं ह. 22. संख्यापरिच्छेदे क. 23. च इत्यधिकन् ड. फ. 24. वकारस्य नास्ति फ. 25. घत्वादेशः ड. फ, घकारः ह.